# A-II/1/2390/22

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'आप्तमीमांसा' इति पदस्य कोऽर्थः?
2. आप्तमीमांसाग्रन्थस्य कर्तुः नाम किम्?
3. पाठ्यग्रन्थस्य आप्तमीमांसायाः अपरनाम किम्?
4. आप्तमीमांसाग्रन्थस्योपरि विरचिताः संस्कृतटीकाः सूचनीयाः।
5. ग्रन्थस्य मङ्गलाचरणे 'नातस्त्वमसिनो महान्' इत्यस्य कः भावः?
6. एकान्तग्रहरक्तेषु नाथ! स्वपरवैरिषु' इति स्पष्टयत।
7. दोषावरणयोः हानिः केन हेतुना प्रज्ञप्ता।
8. आप्ताभिमानदग्धानां स्वेष्टं दृष्टेन बाध्यते' इत्यस्य कोऽभिप्रायः?
9. 'स त्वमेवाऽसि निर्दोषो युक्तिशास्त्राऽविरोधिवाक्' इति कथं प्रोक्तम्?
10. प्रागभावस्य निह्नवे कः दोषः?
11. अभावैकान्तपक्षे कः प्रमुखः दोषः ख्यापितः?

**अथवा**

वस्तुनि अर्थक्रियाकारित्वं कदा संभवति?

12. अद्वैतैकान्तपक्षे कः प्रमुखः दोषः प्रदर्शितः सूरिभिः?

**अथवा**

"अद्वैतं न विना द्वैतादहेतुरिव हेतुना" इति वचनं स्पष्टयत।

13. यदि ज्ञानात् ज्ञेयं सर्वथा भिन्नं स्वीकरोति तर्हि ग्रन्थकारेण कः दोषः प्रदर्शितः?

**अथवा**

"प्रमाणगोचरौ सन्तौ भेदाऽभेदौ न संवृती" इत्यस्य भावं स्पष्टयत।

14. "यदि सत्सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति" इति कथं प्रोक्तम्?

**अथवा**

यद्यसत्सर्वथा कार्यं तर्हि कः दोषः प्रदर्शितः ग्रन्थकारेण।

15. चतुष्कोटिविकल्पस्य मान्यता केषां वर्तते?

**अथवा**

प्रमाणस्य किं फलम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थदिशा सप्तभङ्गीन्यायः प्रस्तोतव्यः।

17. तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनम्।
क्रमभावि च यज्ज्ञानं स्याद्वादनयसंस्कृतम्॥ –इति कारिकां स्पष्टयत।

18. स्याद्वादसिद्धान्तस्य उपयोगित्वं वर्णयत।

**अथवा**

नयविषयमधिकृत्य एका टिप्पणी संक्षेपेण लेखनीया।

19. मिथ्यासमूहो मिथ्या चेन्न मिथ्यैकान्ततास्ति नः।
निरपेक्षा नया मिथ्या सापेक्षावस्तु तेऽर्थकृत्॥ –इति कारिकां विवेचयत।

**अथवा**

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्।
शोक–प्रमोद–माध्यस्थ्यं जनो याति सहेतुकम्॥ –इति सप्रसङ्गं व्याख्यात।

20. सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा।
अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः॥ –इति कारिकायाः भावं वर्णयत।

**अथवा**

प्रागादीनां चतुर्णाम् अभावानां स्वरूपं स्पष्टयत।

**स. प्रश्नः दीर्घोत्तरेण समाधेयः।** **(1×20=20)**

21. अनेकान्तवादमधिकृत्य एकः निबन्धः लेखनीयः।

**अथवा**

ग्रन्थकारसमन्तभद्राचार्यस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।

# A-II/2/2391/22

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. समयसारग्रन्थस्य कर्तुः नाम किं? कदा स च जातः?
2. 'समयसारः' इत्यस्य कोऽर्थः?
3. समयसारस्योपरि विरचिताः संस्कृतटीकाः सूचनीयाः।
4. समयसारग्रन्थस्य भाषा का?
5. कर्तृकर्माधिकारे कति गाथाः सन्ति?
6. दुःखस्य कारणं किम्?
7. 'अहमिक्को खलु सुद्धो' इत्यस्य कोऽर्थः?
8. ग्रन्थदिशा ज्ञानी कोऽस्ति?
9. 'णिच्छयणयस्स एवं आदा अप्पाणमेव हि करेदि' इति स्पष्टयत।
10. मोहयुक्तोपयोगेन त्रिविधाः परिणामाः के सन्ति?
11. जीवानां कः भावः तेषु जीवेषु कर्मणां कर्ता भवति?

**अथवा**

"जं भावं सुहमसुहं करेदि आदा स तस्य खलु कर्ता" इति स्पष्टयत।

12. "जं कुणइ भावमादा कत्ता सो होदि तस्स भावस्स" इति वाक्यस्य अर्थः कार्यः।

**अथवा**

"परमप्पाणमकुव्वं अप्पाणं पि य परं अकुव्वंतो" इत्यस्य किं तात्पर्यम्?

13. बंधस्य चत्वारि कारणानि कानि?

**अथवा**

"अण्णाणमओ भावो अणाणिणे कुणदि तेण कम्माणि" इत्यस्य भावः प्रज्ञापनीयः।

14. शुद्धाणयस्स दु जीवे अबद्धपुट्ठं हवइ कम्मं" इत्यस्य अर्थो विधेयः।

**अथवा**

कः समयसारः?

15. केवलिपुरुषस्य स्तुतिः कदा भवति ?

**अथवा**

"एवं पराणि दव्वाणि अप्पयं कुणदि मंदबुद्धीओ" इत्यस्य भावः कः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पक्षातिक्रान्तस्य जीवस्य स्वरूपं वर्णयत।

17. गाथेयं व्याख्येया –

एदेण दु सो कत्ता आदा णिच्छयविदूहिं परिकहिदो।

एवं खलु जो जाणदि सो मुंचदि सव्वकत्तितं॥

18. मिथ्यात्वादीनां त्रयाणां परिणामानां वर्णनं कुरुत।

**अथवा**

जम्हा दु अत्तभावं पोग्गलभावं च दो वि कुव्वंति।

तेण दु मिच्छादिट्ठी दोकिरियावादिणो हुंति॥ अस्याः गाथायाः भावं स्पष्टयत।

19. श्लोकोऽयं सप्रसङ्गं व्याख्येयः –

यः परिणमति स कर्ता यः परिणामो भवेत्तु तत्कर्म।

या परिणतिः क्रिया सा त्रयमपि भिन्नं न वस्तुतया॥

**अथवा**

आत्मभावान् करोत्यात्मा परभावान् सदा परः।

आत्मैव ह्यात्मनो भावाः परस्य पर एव ते॥

20. पाठ्यग्रन्थदिशा कर्तृकर्मविवेचनस्य संक्षेपेण समीक्षा कार्या।

**अथवा**

जाव ण वेदि विसेसंतरं तु आदासवाण दोण्हं पि।

अण्णाणी ताव दु सो कोहादिसु वट्टदे जीवो॥ –इति गाथा विवेचनीया।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. समयसारग्रन्थस्य द्वितीयाधिकारस्य सारांशः लेखनीयः।

**अथवा**

आचार्यकुन्दकुन्दस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।

# A-II/3/2392/22

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. 'उत्तरज्झयणं' इत्यनेन किं तात्पर्यम्?
2. 'विणयसुयं' इत्यत्र विणयशब्देन किमभिधीयते?
3. 'संयोगा विप्पमुक्कस्स' इत्यत्र 'संयोगा:' इत्यनेन किमुक्तम्?
4. विनीत: क: उच्यते?
5. अविनीत: को भवति?
6. 'अप्पादंतो सुही होइ' इति कथनेन किं तात्पर्यम्?
7. परीषहा: कति भवन्ति?
8. 'परीषह:' किमुच्यते?
9. 'छिन्नावाएसु पंथेसु' इत्यनेन किमुक्तम्?
10. 'छवित्ताणं' इति शब्दस्य कोऽर्थ:?
11. 'विदए आयरक्खिए' इत्यनेन किं प्रयोजनम्?

**अथवा**

चत्वारि परमाङ्गानि कानि? नामानि लिखत।

12. 'सोच्चा नेआउयं मगगं' इत्यनेन किं तात्पर्यम्?

**अथवा**

'असंख्यं जीविय मा पमायए' इत्यनेन किं प्रयोजनम्?

13. कडाण कम्माण न मोक्ख अत्थि' इति कथनेन किं संकेतितम्?

**अथवा**

वित्तेण ताणं न लभे पमत्ते' इत्यनेन किं प्रोक्तम्?

14. अकाममरणं किमुच्यते?

**अथवा**

'भूयग्गामं' इत्यनेन किमभिधीयते?

15. सकाममरणं किमुच्यते?

**अथवा**

'सड्ढी काएण फासए' इत्यत्र सड्ढी शब्देन किं तात्पर्यम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कण-कुण्डगं चइत्ताणं विट्ठं भुंजइ सूयरे। एवं सीलं चइत्ताणं दुस्सीले रमइमिए॥ व्याख्यात।

17. हियं विगयभया बुद्धा, फरुसं पि अणुसारणं। वेसं तं होइ मूढाणं खंति सोहिकरं पयं॥ व्याख्यात।

18. तयो पुट्ठो पिवासाए दोगुञ्छी लज्ज संजए। सीओदगं न सेविज्जा वियडस्सेसणं चरे॥ व्याख्यात।

**अथवा**

समणं संजयं दंतं हणेज्जा कोइ कत्थई। नत्थि जीवस्सनासुत्ति एवं पेहेज्ज संजाए॥ व्याख्यात।

19. कम्माणं तु पहाणाए आणु पुव्वी कयाइ उ।

जीवा सोहिमणुप्पत्ता आययंति मणुस्सयं॥ ससन्दर्भं व्याख्यात।

**अथवा**

सुत्तेसु यावी पडिबुद्धजीवी न वीससे पंडिए आसुपन्ने।

घोरा मुहुत्ता अबलं सरीरं भारंडयक्खीव चरऽप्पमत्तो॥ व्याख्यात।

20. जे गिद्धे कामभोगेसु एगे कूडाय गच्छई। न मे दिट्ठे परे लोए, चक्खुदिट्ठा इमा रई॥ व्याख्यात।

**अथवा**

पिंडोलए व दुस्सीले नरगाओ न मुच्चई। भिक्खाए वा गिहत्थे वा सुव्वए कम्मई दिवं॥ व्याख्यात।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(2×10=20)**

21. पठितग्रन्थदिशा उत्तराध्ययनसूत्रस्य महत्त्वं प्रतिपादयत।

**अथवा**

'चा उरंगिज्जं' इति अध्ययनस्य महत्त्वं स्पष्टयत।

# A-II/4/2393/22

## चतुर्थसत्राद्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. आत्मा कतिविधः प्रोक्तः?
2. बहिरात्मा कः प्रोक्तः?
3. परमात्मा कः प्रोक्तः?
4. 'तमात्मानमबुद्धयः' इत्यनेन किमुक्तम्?
5. अन्तरात्मा कीदृशो भवति?
6. जिनस्य विविधनामानि कानि प्रोक्तानि?
7. धर्मः कः प्रोक्तः?
8. धर्मः किं करोति?
9. धर्मस्य प्रधानं लक्षणं किमुक्तम्?
10. सनातनः धर्मः कः प्रोक्तः?
11. 'पापाद् दुःखं धर्मात्सुखमिति' वचनेन किमभिधीयते?

**अथवा**

कषायः किमुच्यते?

12. 'क्रोधः शत्रुः शरीरिणाम्' इत्यनेन किं प्रयोजनम्?

**अथवा**

मानस्य अष्टौ भेदाः के प्रोक्ताः? नामानि लिखत।

13. 'लोभार्तो वित्तमादत्ते' इत्यनेन किं तात्पर्यम्?

**अथवा**

हिंसा का प्रोक्ता?

14. 'अहिंसा जननी मता' इत्यस्य कोऽर्थः?

**अथवा**

'तत्प्रत्येयं स्तेयं सैव च हिंसा वधस्य हेतुत्वात्' इति कथनेन किं प्रयोजनम्?

15. 'मूर्च्छात् ममत्वपरिणामः' इत्यनेन किं तात्पर्यम् ?

**अथवा**

'विरतिर्व्रतम्' इत्यनेन किं सकेतितम् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. मूलं संसार-दुःखस्य देह एवात्मधीस्ततः।
त्यक्त्वैनां प्रविशेदन्तर्बहिरव्यापृतेन्द्रियः॥ इति पद्यं व्याख्यात।

17. आत्मज्ञानात्परं कार्यं न बुद्धौ धारयेच्चिरम्।
कुर्यादर्थवशात्किंचिद्वाक्कायाभ्यामतत्परः॥ इति पद्यं व्याख्यात।

18. रागद्वेषादिकल्लोलैरलोलं यन्मनोजलम्।
स पश्यत्यामनस्तत्त्वं तत्तत्त्वं नेतरो जनः॥ इति पद्यं व्याख्यात।

**अथवा**

कृत्वा धर्म-विघातं विषय-सुखान्यनुभवन्ति ये मोहात्।
आच्छिद्य तरुं मूलात्फलानि गृह्णान्ति ते पापाः॥ इति पद्यं व्याख्यात।

19. लुप्यते मानतः पुंसां विवेकामललोचनम्।
प्रच्यवन्ते ततः शीघ्रं शीलशैलाग्रसंक्रमात्॥ इति पद्यं व्याख्यात।

**अथवा**

नयन्ति विफलं जन्म प्रयासैर्मृत्युगौचरैः।
वराकाः प्राणिनोऽस्त्रं लोभादप्राप्तवाञ्छिताः॥ इति पद्यं व्याख्यात।

20. हिंसायामविरमणं हिंसापरिणमनमपि भवति हिंसा।
तस्मात्प्रमत्तयोगे प्राणव्यपरोपणं नित्यम्॥ इति पद्यं व्याख्यात।

**अथवा**

अणुमात्रादपि ग्रन्थान्मोहग्रन्थिर्दृढीभवेत्।
विसर्पति ततस्तृष्णा यस्यां विश्वं न शान्तये॥ इति पद्यं व्याख्यात।

**स. स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. त्रिविधात्मा संक्षेपेण विवेचनीयः।

**अथवा**

ग्रन्थोक्तदिशा अहिंसायाः वर्णनं कुरुत।

# A-II/5/2394/ 22

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. जैनधर्म: अहिंसाप्रभावक: कथमुच्यते?
2. "चारित्रं खलु धम्मो" इत्यस्य भाव: स्पष्टनीय:।
3. जैनदर्शनानुसारेण तत्त्वज्ञानाय किं खलु मूलं वस्तु अधिगम्यते?
4. जैनदार्शनिकै: कानि द्रव्याणि निर्दिष्टानि?
5. कथं हि जैनदर्शनं यथार्थवादि प्रोच्यते?
6. "अत्थो खलु दण्वमओ" इत्यनेन वचनेन किं प्रज्ञाप्यते सूरिभि:?
7. स्वपरसमयौ कथं हि जैनशास्त्रेषु निर्दिष्टाविति?
8. "परस्परोपग्रहो जीवानाम्" इत्यस्य कोऽर्थ:?
9. "स्निग्धरूक्षत्वाद्बन्ध:" इति स्पष्टयत।
10. व्रतं किं? पञ्च महाव्रतानि निर्देष्टव्यानि।
11. जैनधर्मे व्रताचरणस्य महत्त्वं किमस्ति?

**अथवा**

मुनिधर्मस्य कृते के खलु मूलगुणा अङ्गीकार्या: भवन्ति?

12. पञ्च परमेष्ठिन: के प्रोक्ता: जैनपरम्परायाम्?

**अथवा**

जैनसंस्कृतौ देवपूजाया: महत्त्वं किमस्ति? स्पष्टं लिखत।

13. सन्मार्गाधिरोहणाय अहिंसाऽपरिग्रहमूलकत्वमाचरणं कथम् अपरिहार्यं भवति? स्पष्टयत।

**अथवा**

संसारिणो जीवस्य के खलु औदयिकभावा: प्ररूपिता:? नामानि लिखत।

14. पुण्यपापयोः परस्परं किमन्तरं ज्ञातव्यं भवति ?

**अथवा**

पुण्यपापयोरेकत्वं सूरिभिः कस्मै प्रयोजनाय प्रतिपादितम् ?

15. लोकेऽस्मिन् जम्बूद्वीपः कुत्रास्ते जैनशास्त्रदिशा ?

**अथवा**

षड्विधाः लेश्यापरिणामाः के खलु परिज्ञापिताः जैनदार्शनिकैः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कमपि विषयं स्वीकृत्य स्वसंस्कृतगिरा टिप्पणी कार्या।

(क) अनेकात्मकं वस्तु।

**अथवा**

(ख) मुनिधर्मे स्वीकृतानि द्वादश तपांसि।

17. लघुनिबन्धः लेखनीयः।

(क) जीवस्य स्वरूपं भेदाश्च।

**अथवा**

(ख) पुद्गलस्य लक्षणं भेदाश्च।

18. जैनसंस्कृतेः मूलतत्त्वानि विवेचयत।

**अथवा**

जैनजीवनशैलीं समालोचयत।

19. संसारिणां जीवानामस्तित्वं शरीरं विना नैव ज्ञायते ? जैनशास्त्रदिशा तच्छरीरभेदाः निरूपणीयाः ?

20. जैनधर्मस्य व्यावहारिकपक्षं तत्प्रयोजनञ्च निर्दिश्य लघुनिबन्धः लेखनीयः।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. जैनसंस्कृतौ मुनिधर्मस्य वैशिष्ट्यम्

**अथवा**

जैनधर्मस्य स्वरूपं तदुपयोगश्च